This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M 2205 विषय ~~· स्तोत्र~~

नाव ~~श्रीगुरु गीता (MSS)~~

लेखक / लिपीकार _____

पृठ 14 काळ — पूर्ण / ~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

श्री गुरु गीता प्रारंभः—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ अथ गुरुगीता प्रारंभः- ॥ ॐ गुरुगीता
स्तोत्रमंत्रस्य श्रीसांब सदाशीव ऋषिः ॥ नानाविधानि छंदांसि
श्रीगुरुपरमात्मा देवता ॥ हं बीजं ॥ सः शक्तिः ॥ क्रौं कीलकं ॥ श्रीगुरु
प्रसादसिध्यर्थे जपे विनियोगः ॥ अथ न्यासः ॥ ॐ हं सां सूर्यात्मने
अंगुष्ठाभ्यां नमः ॥ ॐ हं सीं सोमात्मने त० ॥ ॐ हं सूं निरंजनात्मने
मध्य० ॥ ॐ हं सैं निराभासात्मने अ० ॥ ॐ हं सौं अतनुसुक्ष्मात्मने
कनि० ॥ ॐ हं सः अव्यक्तात्मने करतल० ॥ एवं हृदयादि न्यासः अस्त्रायफट्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति दिग्बंधः ॥ अथ ध्यानं ॥ हंसाभ्यां परिवृत्त पत्र कमलै दिव्यै जगित्कारणै-
र्विश्वो त्कीर्ण मनेक देह निलयै: स्वच्छंद मालेच्छया ॥ लघो त्वं पद
शांभवं तु चरणं दीपांकुर ग्राहिणं ॥ प्रत्यक्षाक्षर विग्रहं गुरु पदं ध्याये-
द्विभुं शाश्वतम् ॥ गुरुर्ब्रह्मा ० ॥ ब्रह्मानंदं परम ० ॥ मम चतुर्विध
पुरुषार्थ सिध्यर्थे जपे विनियोगः ॥ सूत उवाच ॥ कैलासे शिखरे
रम्ये भक्ति संधान नायकं ॥ प्रणम्य पार्वती भक्त्या शंकरं पर्यपृच्छत ॥ १ ॥
श्री देव्युवाच ॥ ॐ नमो देव देवेश परात्पर जगद्गुरो ॥ सदाशिव

महादेव गुरु दीक्षां प्रदेहि मे ॥ २ ॥ केन मार्गेण भो स्वामिन् देही
ब्रह्ममयो भवेत् ॥ त्वं कृपां कुरु मे स्वामिन् नमामि चरणौ तव ॥ ३ ॥
ईश्वर उवाच ॥ मम रूपासि देवित्वं त्वद्हित्यार्थ वदाम्यहं ॥ लोको
पकारकं पक्षं न केनापि पुराकृतं ॥ ४ ॥ दुर्लभं त्रिषु लोकेषु
तच्छृणुष्वं वदाम्यहं ॥ गुरुं ब्रह्म विना नान्यत्सत्यं सत्यं वदाम्यहं ॥ ५ ॥
वेद शास्त्र पुराणानि चेतिहासादिकानिच ॥ मंत्र यंत्रादि
विद्यानां स्मृतिरुच्चाटनादिकं ॥ ६ ॥ शैव शाक्त्या गमादिनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यानि विविधानिच॥ अपभ्रंश कराणीह जीवानां भ्रांत
चेतसां ॥७॥ यज्ञो व्रतं तपो दानं जप स्तीर्थं तथैवच॥
गुरुतत्वमविज्ञाय मूढाः स्वन्यरता जनाः ॥८॥ गुरुबुध्या
तनो नान्यत्सत्यं सत्यं न संशयः॥ तत्प्राप्यर्थं प्रयत्नस्तु
कर्तव्यो हि मनीषिभिः॥९॥ मूढाविद्याजगन्माया देहश्चा
ज्ञान संज्ञितः॥ उदयः स्वप्रकाशेन गुरु शब्देन कथ्यते॥१०॥
देहो ब्रह्म भवेत्तस्य तत्प्राप्यर्थं वदामितत्॥ सर्वपाप विशुद्धात्मा २

श्री गुरोः पाद पंकजं॥११॥ सर्व तीर्थविगाहस्य संप्राप्नोति
फलं नरः॥ गुरु पादांबुजं स्नुत्वा जलं शिरसि धारयेत्॥१२॥
शोषणं पाप पंकस्य दीपनं ज्ञान तेजसां॥ गुरु पादोदकं पीत्वा
संसारार्णव तारणं॥१३॥ अज्ञान मूल हरणं जन्म कर्म निवारणं॥
ज्ञानं वैराग्य सिध्यर्थं गुरु पादोदकं पिबेत्॥१४॥ गुरु पादोदकं पीत्वा
गुरोरुच्छिष्ट भोजनं॥ गुरु मूर्तेः सदाध्यानं गुरुर्मंत्रं सदाजपेत्॥१५॥
काशी क्षेत्र निवासश्च जान्हवी चरणोदकं॥ गुरु विश्वेश्वरः साक्षात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तारकं ब्रह्म निश्चितं ॥१७॥ गुरो: पादोदकं यत्तु गयास्ते साधयो
वर: ॥ तीर्थराज प्रयाग स्त्वं गुरु मूर्ते नमोनम: ॥१७॥ गुरु मूर्तीं स्मरे नि-
त्यं गुरु नाम सदा जपेत् ॥ गुरो राज्ञां प्रकुर्वीत गुरो रन्यं न भावयेत् ॥१८॥
गुरु वक्त्र स्थितं ब्रह्म प्राप्यते तत्प्रसादत: ॥ गुरुमूर्ते: सदा ध्यानं यथा
योषिच्च पुंश्चली ॥१९॥ स्वश्रेयं च स्वजातिं च स्वकीर्ते: पुष्टिवर्धनं ॥
अन्यं सर्वं परित्यज्य गुरो रन्यं न भावयेत् ॥२०॥ अनन्याश्चिंतयंतो
मां सुलभं परमं पदं ॥ तस्मात्सर्व प्रयत्नेन गुरो राराधनं कुरु ॥२१॥

गुरु वक्त्र स्थिता विद्या गुरु भक्त्या तु लभ्यते ॥ त्रैलोक्ये स्फुट वक्तारो
देवाद्यासुर पुंगवा ॥२२॥ गुकार स्त्वंधकार श्च रुकार स्तेज उच्यते ॥अ-
ज्ञान ध्वसकं ब्रह्म गुरुदेव नमो स्तुते ॥२३॥ गुकार: प्रथम: शब्दो मायादि गुण
आश्रय: ॥ रुकारो द्वितीयं ब्रह्म माया भ्रांति विमोहितं ॥२४॥ एवं गुरुपद श्रेष्ठं
देवानामपि दुर्लभं ॥ हाहा हू हू गणै श्चैव गंधर्वै श्चैव पूज्यते ॥२५॥ ध्रुवं
तेषां च सर्वेषां नास्ति तत्वं गुरो: परं ॥ आसनं शयनं वस्त्रं वाहनादि
विभूषणं ॥२६॥ साधकेन प्रदातव्यं गुरु संतोषकारकं ॥ गुरोरारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनं कार्यं स्वजीवित्व निवेदयेत ॥२७॥ कर्मणा मनसा वाचा
नित्यमाराधये द्गुरुं ॥ दीर्घ दंडं नमस्कृत्य निर्लज्जो गुरुसन्नि
धौ ॥ २८॥ शरीरें मिंद्रियं प्राणं सद्गुरुभ्यो निवेदयेत ॥ आत्मा
दारादिकं सर्व सद्गुरुभ्यो निवेदयेत ॥२९॥ कृमि कीट भस्म निष्ठ दुर्गंधं
मल मूत्रकं ॥ श्लेष्मरक्तं तथा चर्म वंचयेन्न वरानने ॥ ३० ॥ संसारवृक्ष
मारूढाः पतान्ति नरकार्णवे ॥ येन चोध्दरिताः सर्वे तस्मै श्रीगुरवेनमः ॥३१॥
गुरु ब्रह्मा गुरु विष्णुः गुरु देवो महेश्वरः ॥ गुरु एव परब्रह्म तं ३२॥

हेतवे जगतामेव संसाराणव सेतवे ॥ प्रभवे सर्व विद्यानां शंभवे
गुरवे नमः ॥ ३३॥ अज्ञान तिमिरांधस्य ज्ञानांजन शलाकया ॥
चक्षुरुन्मीलितं येन तस्मै ॥३४॥ त्वंपिता त्वं च मे माता त्वं
बंधुस्त्वं च देवता ॥ संसार प्रतिबोधार्थं तस्मै ॥३५॥ यत्सत्येन
जगत्सत्यं यत्प्रकाशेन भाति यत् ॥ यदानंदेन नंदान्ति तस्मै ॥३६॥
यस्य स्थित्या इदं सत्यं यद्भिदा भानुरूपता ॥ यत्प्रियात्प्रिय पुत्रादि-
तस्मै ॥ ३७॥ येन चेतयते हीदं चित्तं चेतयते नमः ॥ जागृत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वप्न सुषुप्त्यादि तस्मै० ॥३८॥ यस्य ज्ञानादिदं विश्वं न
दृश्यं भिन्न भेदतः ॥ सदेकरूप रूपाय तस्मै० ॥३९॥ यस्य
मात्रान्मतं स्वाभ तंतं यस्य न वेद सः ॥ अनन्य भाव भा-
वाय तस्मै० ॥४०॥ यस्य कारण रूपस्य कार्य रूपेण भाति यत् ॥ का-
र्यकारणतामेव तस्मै० ॥४१॥ नानारूपमिदं सर्वं न केनाप्यस्ति
भिन्नतः ॥ कार्यकारणता मेव तस्मै० ॥४२॥ यदांघ्रिकमलं
द्वंद्वं द्वंद्वताप निवारकं ॥ तारकं सर्वदापद्भ्यो श्री गुरोः प्रणमा-

म्यहम् ॥४३॥ शिवे क्रुध्धे गुरुस्त्राता गुरौ क्रुध्धे शिवो नहि ॥
तस्मात्सर्व प्रयत्नेन श्री गुरुं शरणं व्रजेत् ॥४४॥ वंदे गुरुपदं
द्वंद्व वाङ्मनातीत गोचरं ॥ श्वेत रक्त प्रभा भिन्नं शिवशक्त्या
त्मकं परं ॥४५॥ गुकारं च गुणातीतं रूकारं गुण वर्जितं ॥ गुणा-
तीत स्वरूपं च यो दद्यात् सद्गुरु स्मृतः ॥४६॥ अग्निनेत्रः सर्व
साक्षी चतुर्बाहुस्त्रि लोचनं ॥ य चतुर्वदनो ब्रह्मा श्री गुरुः क-
थितः प्रिये ॥४७॥ अयं मायांजलिं बध्वा दयासागर-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृद्धये ॥ यदनुग्रह जाताही चिन्नं संसार मुक्तये ॥ ४८ ॥
श्री गुरोः परमं रूपं विवेकं चक्षुचामृतं ॥ मंद भाग्या न
पश्यंति अंधः सूर्योदयं यथा ॥ ४९ ॥ श्री नाथ चरणद्वंद्व
यस्यादिशो विराजते ॥ तस्यै दिशे नमस्कुर्यद्भक्त्या प्रातीदैन-
न्यिये ॥ ५० ॥ तस्यै दिशे सतत मंजलि रेष आर्ये प्राक्षिप्यते मुख-
रितै मधुरैर्बुधैश्च ॥ जागर्ति यत्र भगवान् गुरु चक्रवर्ती विश्वोदये
मलय नाटक नित्य साक्षी ॥ ५१ ॥ श्री नाथादि गुरु त्रयं गणपतिं

६

पीठ त्रयं भैरवं ॥ सिध्धेभ्यो बटुक त्रयं पदयुगं दूती त्रयं शांभवं ॥ ५२
वीरेचाष्ट चतुष्क षष्टि नवकं वीरावली पंचकं ॥ श्रीमन्मालि निमंत्र
राज सहितं वंदे गुरो मंडलम् ॥ ५३ ॥ अभ्यस्तैः किमु दीर्घ कालमनिलै
र्व्याधि प्रदैर्दुष्करैः ॥ प्राणायाम शतैरनेक करणै दुःखात्मकैः दुष्यते ॥
यस्मिन्नभ्युदिते विनश्यति बली वायु स्वयं तत्क्षणात् प्राप्यं तत्सहजं
स्वभाव मनिशं सेवध्वमेकं गुरुं ॥ ५४ ॥ स्वदेशीक स्यैव शरीर चिंतनं
भवेदनंतस्य शिवस्य चिंतनं ॥ स्वदेशीक स्यैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवेदनंतस्य शिवस्य कीर्तनं ॥५५॥ यत्पादरेणु
कणिका भुक्ता संसार वारिधेः ॥सेतुं बध्यते नाथो दौर्शीकं तमु-
पास्महे ॥५६॥ यस्यादनुग्रहं लब्ध्वा महा मंडव मुत्सृजेत् ॥ तस्मै
श्री दौर्शीकेंद्राय नमः श्वाभिष्टये ॥५७॥ पादाब्जं सर्व संसार
दावानल विनाशकं ॥ नंदेरंध्रे सितां भोज मध्य स्थं चंद्र मंडले ॥५८॥
अकथादित्रि रेखाब्जे सहस्त्र दल मंडिते ॥

॥५९॥ सकल भुवन सृष्टिः कालिलो

शेष पुष्टि निखिल निगम दृष्टिः संपदा व्यर्थ दृष्टिः ॥ ३ ॥ त्रिगुण
परमेष्ठी स्तत्पदार्थैक दृष्टिर्भवगुण परमेष्टि मोक्ष मार्गैक दृष्टिः ॥६०॥
सकल सम सृष्टिः सच्चिदानंद दृष्टि निर्विसतु मयि नित्यं श्री गुरोर्दि
व्यदृष्टिः ॥ आग्नेयुद्ध समंतात ज्वाला परिचक्राधिया मंत्रराज
मिमं मन्येऽहनिशं पातु मृत्युतः ॥६१॥ येदजाति तवेनेति यद्दूरे
त्त समीपके ॥ तदंतरस्य सर्वस्य तदु सर्वस्य बाह्यतः ॥६२॥
अजोहमजरोहंच अनादि नित्यतः स्वयं ॥ अविकारि चिदानंदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अणिम्नो महतो रूपम् ॥६३॥ अपूर्वाणां परं नित्यं स्वयं
ज्योति निरामयम् ॥ विरजं परमाकाशं ध्रुवमानंद मव्ययम् ॥
॥६४॥ श्रुत्वा प्रत्यहमेतद्धि अनुमानं चतुष्टयम् ॥ तस्य चात्म
तपो वेदा स्वदेकं च सदा स्मरन् ॥ ६५॥ मननं यश्चनं कार्यं तद्
दामि महामते ॥ साधुत्वं च मया दृष्ट्वा त्वयि तिष्ठति सांप्रतं ॥६६॥
अखंडमंडलाकारं व्याप्तं येन चराचरं ॥ तत्पदं दर्शितं येन
तस्मैश्रीगुरवे नमः ॥६७॥ सर्वश्रुतिशिरोरत्नं विराजित पदांबुजं ॥

वेदांतांबुज सूर्याय तस्मै० ॥ ६८॥ यस्य स्मरणमात्रेण ज्ञान
मुत्पद्यते स्वयं ॥ स एव सर्व संप्राप्तिः तस्मै० ॥६९॥ चैतन्यात्मः
शिवः शांतो व्योमातीतो निरंजनः ॥ नादबिंदु कलातीतः तस्मै०
॥७०॥ स्थावरं चाचरं शांतं जंगमं चरमेव च ॥ व्याप्तं येन जगत्सर्वं
तस्मैश्री० ॥ ७१॥ ज्ञानशक्ति समारूढ स्तत्त्वमाला विभूषितः ॥ भुक्ति
मुक्ति प्रदाता च तस्मै श्री० ॥७२॥ अनेक जन्म संप्राप्तं सर्व कर्मविदा
हिमे ॥ ज्ञानं बोधं प्रभावेन तस्मै श्री० ॥७३॥ न गुरोरधिकं तत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न गुरोरधिकं तपः ॥ तत्व ज्ञानात्परं नास्ति तस्मै श्री ॥७२॥
मन्नाथः श्रीजगन्नाथो मद्गुरुः श्री जगद्गुरुः ॥ ममात्मा सर्व
भूतात्मा तस्मै श्री० ॥७५॥ ध्यान मूलं गुरो र्मुर्ति पूजा मूलं
गुरो पदं ॥ मंत्र मूलं गुरो र्वाक्यं मोक्ष मूलं गुरोः कृपा ॥७६॥
गुरुरादिरनादिश्च गुरुः परम दैवतं ॥ गुरो समानतो नास्ति
तस्मै श्री० ॥ ७७॥ सप्त सागर पर्यंतं तीर्थ स्नान फलं यथा ॥
गुरो रंघ्रि जलं बिंदु सहस्त्रांशेन दुर्लभं ॥७८॥ गुरु रेव जगत्सर्व

ब्रह्मा विष्णु शिवात्मकं ॥ गुरो परतरं नास्ति तस्मात्संपुजये
द्गुरुम् ॥ ७९॥ ज्ञानं विना मुक्ति पदं लभ्यते गुरु भक्तितः ॥ गुरोः
समानतो नास्ति साधये द्गुरु मार्गिणः ॥८०॥ यस्मात् परतरं नास्ति
नेति नेतीति या श्रुतिः ॥ मनसा वचसा चैव गुरु देवः परः स्मृतः
॥८१॥ गुरोः कृपा प्रसादेन ~~कैवल्यं गुरु सेवया ॥~~ ब्रह्मा विष्णुशिवा
त्मकं ॥ सामर्थ्यं तत्प्रसादेन कैवल्यं गुरु सेवया ॥८२॥ देव किंनर
गंधर्वाः पितृयक्षास्तु चारणाः ॥ मुनयोऽपि न जानंति गुरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुश्रुषणे विधिम् ॥८३॥ महाहंकार गर्वेण तपोनिधाबला
न्वितः ॥ संसार कुहरावर्ते घटी यंत्र यथा पुनः ॥ ८४॥ नमुक्ता-
देव गंधर्व पितरो यक्ष किंनराः ॥ ऋषयः सर्वसिध्दाश्च गुरु
सेवा पराऽमुरवाः ॥ ८५॥ ध्यानं शृणु महादेवि सर्वानंदप्रदा
यकं ॥ सर्व सौख्य प्रदं चैव भुक्ति मुक्ति प्रदायकम् ॥ ८६॥ श्री
मत्परंब्रह्म गुरुं वदामि श्रीमत्परंब्रह्म गुरुं भजामि ॥ श्री
मत्परं ब्रह्म गुरुं नमामि श्रीमत्परं ब्रह्म गुरुं स्मरामि ॥ ८७॥ १०

ब्रह्मानंदं परम सुखदं केवलं ज्ञानमूर्ती द्वंद्वातीतं गगन
सदृशं तत्वमस्यादि लक्ष्यं ॥ एकं नित्यं विमल मचलं सर्व
धी साक्षिभूतं भावातीतं त्रिगुण रहितं सद्गुरुं तंनमामि ॥ ८८
नित्यं शुध्दं निराभासं निराकारंनिरंजनं ॥ नित्यबोधंचिदा
नंदं गुरुं ब्रह्म नमाम्यहम् ॥ ८९॥ हृदंबुजे कर्णिक मध्य संस्थं
सिंहासने संस्थित दिव्य मूर्तीं ॥ ध्याये द्गुरुं चंद्रकला प्रकाशं
चित् पुस्तकाभिष्ट वरं प्रदानं ॥ ९०॥ श्वेतांबरं श्वेत विलेप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुष्पं मुक्ता विभूषं मुदितं द्विनेत्रं ॥ वामांग पीठस्थित दिव्य
शक्तिं मंदास्मितं साद्रं कृपानिधानं ॥९७॥ आनंद मानद करं प्रसन्नं
ज्ञान स्वरूपं निजबोध युक्तम् ॥ योगींद्र मीड्यं भवरोग वैद्यं श्री
मद्गुरुं नित्य महं नमामि ॥९२॥ यास्मेन् सृष्टि स्थिति ध्वंस निग्र
हानुग्रहात्मकं ॥ कृत्यं पंचविधं शश्वद्वासते तंनमाम्यहम् ॥९३॥
प्रातःशिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुं वराभय युतं शांतं
स्मरंत नाम पूर्वकम् ॥९४॥ न गुरोरधिकं न गुरोरधिकं

न गुरोरधिकं न गुरोरधिकं ॥ शिवशासनतः शिवशासनतः
शिवशासनतः शिवशासनतः ॥९५॥ इदमेव शिवं विदमेवशिवं
विदमेव शिवं विदमेवशिवं ॥ मम शासनतो मम शासनतो मम
शासनतो मम शासनतः ॥९६॥ एवं विधं गुरुं ध्यात्वा ज्ञानमु
त्पद्यते स्वयं ॥ तत्सद्गुरु प्रसादेन मुक्तोहमिति भावयेत् ॥९७॥
गुरु निरूपये न्मार्गं मन शुद्धिं तु कारयेत् ॥ अन्यच्च खंडयेत्सर्व
यल्किंचिदात्म गोचरं ॥९८॥ ज्ञेयं सर्व स्वरूपंच ज्ञानं च मन उच्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानं ज्ञेयं समं कुर्यान्नान्यः पंथा द्वितीयकः ॥ ९६ ॥ एवं श्रुत्वा महादेवि
गुरुनिंदां करोति यः ॥ स याति नरकं घोरं यावच्चंद्र दिवाकरौ ॥ ९७ ॥
यावत्कल्पांतको देहस्तावदेव गुरुं स्मरेत् ॥ गुरुतोपो न कर्तव्यः
स्वच्छंदो यदि वा भवेत् ॥ ९७ ॥ हुंकारेण न वक्तव्यं प्राज्ञैः शिष्यैः
कथंचन ॥ गुरोरग्रे न वक्तव्यमसत्यं च कदाचन ॥ २ ॥ गुरुं हुंकृत्य
त्वंकृत्य गुरुं निर्जित्य वादतः ॥ अरण्ये निर्जले देशे स भवेद्ब्रह्म
राक्षसः ॥ ३ ॥ मुनिभिः पन्नगैर्वापि सुरैर्वा शापितो यदि ॥ ९२

कालमृत्यु भया द्वापि गुरुरक्षति पार्वति ॥ ४ ॥ ऋषयः हि सुराश्चा
श्च ऋषयो मुनयस्तथा ॥ गुरुशापेन ते शीघ्रं क्षयं यांति न संशयः ॥ ५ ॥
मंत्रराज मिदं देवी गुरुरित्यक्षरद्वयम् ॥ स्मृति वेदार्थवाक्यानि
गुरुः साक्षात्परं पदं ॥ ६ ॥ श्रुति स्मृतीति विज्ञाय केवलं गुरुसेवया
ते वै संन्यासिनः प्रोक्ता इतरे वेषधारिणः ॥ ७ ॥ नित्यं ब्रह्म निराकारं
निर्गुणं बोधयेत्परं ॥ सर्वं ब्रह्म निराभासं दीपो दीपांतरं यथा ॥ ८ ॥
गुरोः कृपाप्रसादेन आत्मारामं निरीक्षयेत् ॥ अनेन मुक्तिमार्गेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मज्ञानं प्रवर्तते ॥९॥ आब्रह्मस्तंब पर्यंतं परमात्म स्वरूपकं ॥
स्थावरं जंगमं चैव प्रणमामि जगन्मयं ॥१०॥ वंदे हं सच्चिदानंद-
भेदातीतं सदा गुरुं ॥ नित्यं पूर्णं निराकारं निर्गुणं स्वात्म संस्थितं ॥११॥
परात्परतरं ध्येयं नित्यमानंद कारकं ॥ हृदयाकाश मध्यस्थं
शुद्ध स्फटिक सन्निभं ॥१२॥ स्फटिक प्रतिमा रूपं दृश्यते दर्पणे
यथा ॥ यथात्मनि चिदाकार मानंद सोहमित्युत ॥१३॥ अंगुष्टमात्रं
पुरुषं ध्यायते चिन्मयं हृदि ॥ तत्र स्फुरति भावोयं शृणु तत्कथयाम्यहं ॥१४॥

१२

अगोचरं तथागम्यं रूपनामादिवर्जितं ॥ निःशब्दं तद्विजानी
यात्स्वभावं ब्रह्म पार्वति ॥१५॥ यथा नित्यं स्वभावेन कर्पूरं करुणा-
दिकं ॥ शीतोष्णादिक भावेन तथा ब्रह्म च शाश्वतं ॥१६॥ स्वयं तथा
विधो भूत्वा स्थातव्यं यत्र कुत्रचित ॥ कीट भ्रमर वत्तत्र ध्यानं
भवति तादृशं ॥१७॥ गुरुध्यानं तथा कृत्वा स्वयं ब्रह्ममयो भवेत ॥
पिंडे पदे तथा रूपे मुक्तास्ते नात्र संशयः ॥१८॥ स्वयं सर्वमयो भूत्वा
तत्परं च विलोकयेत ॥ परात्परतरं नान्यत्सर्वमेव निरालयं ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यावलोकनं प्राप्तं सर्वसंग विवर्जितं ॥ एकाकि निस्पृहः शांतः
स्थातव्यं तत्प्रसादतः ॥ २० ॥ लब्धं वाथ न लब्धं वा चात्वं वाबहुलं
तथा ॥ निष्कामेनैव भोक्तव्यं सदा संतुष्टमानसः ॥ २१ ॥ सर्वज्ञपद
मित्याहु र्देही सर्व(सर्व)मयो बुधः ॥ सदानंदः सदाशांतो रमते यत्र कुत्र
चित् ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=11.09.19 11:23
,TRANSFERRED=2019/09/11 at 11:30:10
,PAGES=17
,TYPE=STD
,NAME=S0001733
,Book Name=M-2205-SHRIGURUGEETA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection